IJCRT.ORG ISSN : 2320-2882
INTERNATIONAL JOURNAL OF CREATIVE RESEARCH THOUGHTS (IJCRT)
An International Open Access, Peer-reviewed, Refereed Journal

# शब्दतत्त्वविचारः

**डॉ.योगेश्वरस्वामी**
**(नव्यव्याकरणाचार्यः, वेदांताचार्यः,**
**नव्यन्यायाचार्यः,विद्यावारिधिः)**
**स्वामिनारायणसंस्कृतविद्याप्रतिष्ठानम्**
**सरधारः – गुजरातम्**

***Abstract*** - लोकेऽस्मिन् सर्वेषु व्यवहारेषु भाषायाः प्रयोगः आवश्यकः । सा भाषाऽपि शब्दाधीना वर्तते । अतः वस्तुतः एतत् शब्दनामकं तत्त्वं किम् ? वैयाकरणानां मीमांसकानां वैशेषिकानां नैयायिकानां वेदान्तिनां सांख्यवादिनां मते शब्दः इति किम् तत्त्वं ? शब्देन कस्य ग्रहणं भवति ? इति अस्मिन् शोधपत्रे अतिसंक्षेपतया स्फुटं मया प्रस्तूयते । अनेन शोधार्थिनां कृते महान् लाभो भविष्यति इति मे आशा ।

जगदिदं शब्दब्रह्मणः विवर्तनमिति मतं प्रायशः सर्वैः स्वीक्रियते । बहुष्वपि शास्त्रेषु शब्दस्य ब्रह्ममयत्वं स्वीकृतम् । सर्वैश्च शब्दब्रह्मणः स्वरूपविषये महती चर्चा विहिता । उक्तश्च हरिणा –

**अनादिनिधनं ब्रह्म शब्दतत्त्वं यदक्षरम् ।**
**विवर्ततेऽर्थभावेन प्रक्रिया जगतो यतः ॥**

सुविदितमेव यत् कस्यापि वस्तुनः सिद्धिः प्रमाणाधीनैव भवति । अत एव सर्वैः शास्त्रकृद्भिः महर्षिभिः प्रमाणान्येव सुनिरूपितानि । प्रमाणेष्वपि शाब्दप्रमाणं शाब्दबोधं वाऽऽदाय शास्त्रे विचारणा क्रियते । पुनश्च भाषायाः शब्दार्थस्य च स्वरूपं किम् ? प्रारम्भः कदाऽभूत्, कथमभूत् इत्यादिप्रश्नेषु तद्वैज्ञानिकानां विद्यमानासु अनेकपरिकल्पनासु नाद्यावधि यथा इदम् इत्थंरूपेण इत्यत्र ऐकमत्यं जातम् । एवञ्च सर्वोऽपि व्यवहारो भाषानिबन्धनः, भाषा च शब्दनिबन्धना । अत एव लोके निखिलोऽपि व्यवहारः शब्देनानुविद्ध इव प्रतीयते । नास्ति सोऽर्थः य इह कदाचित् क्वचित् कथञ्चित् शब्देन वियुज्यते । तदुक्तं हरिणा –

**न सोऽस्ति प्रत्ययो लोके यः शब्दानुगमादृते ।**
**अनुविद्धमिव ज्ञानं सर्वं शब्देन भासते ॥**

अतश्च यदि शब्दप्रमाणः नैव स्यात् तर्हि अन्ततोगत्वा लोकानां व्यवहारा एव दिवङ्गता भवेयुः । पुनश्चोक्तं महाभाष्यकृता – ‘ एकः शब्दः सम्यग् ज्ञातः शास्त्रान्वितः सुप्रयुक्तः स्वर्गे लोके च कामधुग्भवति ’ । अतोऽस्ति हि शब्दः तात्विकः । शब्दविषयमिममाधारीकृत्य एवायं लेखः, अतः शब्दाधिगतं किञ्चित् समीक्ष्यते ।

**पाणिनिमते शब्दतत्त्वविचारः**

“ अर्थवदधातुरप्रत्ययः प्रातिपदिकम् ” इति सूत्रादेवमनुमीयते यत् पाणिनिना स्फोटात्मकः शब्दः स्वीकृतः । यतो हि अनेनार्थविषयकबोधजनकं शब्दमुद्दिश्य प्रातिपदिकसञ्ज्ञा विधीयते । शब्देऽर्थविषयकबोधजनकत्वरूपाशक्तेरभावात् स्फोटात्मकं शब्दं विनोक्तसञ्ज्ञाविधायकस्य सूत्रस्य व्यर्थत्वं स्यात् । एवमेव “ इको यणचि ” इत्यनेन सूत्रेण इकः स्थाने यणादेशं भवितुं नार्हति । स्फोटात्मकशब्दस्य स्वीकारात् । शास्त्रप्रक्रियानिर्वाहार्थं ध्वन्यात्मकः शब्दोऽपि पाणिनिनाङ्गीकृतः । यद्यपि तेन साक्षात्शब्देन शब्दस्य स्वरूपं नोक्तम्, तथाप्युपर्युक्तविवेचनेन ज्ञायते यद् द्विविधः शब्दस्तेनावश्यं स्वीकृतोऽस्ति ।

पाणिनिमते व्याकरणशास्त्रारम्भादपि शब्दानां नित्यं सूपपद्यते । तथा हि – शब्दा यद्यनित्या भवेयुस्तर्हि ये शब्दाः पूर्ववर्तिभिः शाकटायनगालवप्रभृतिभिर्वैयाकरणैः साधुत्वेन निर्दिष्टाः शब्दा एवोत्तरकालिकैर्वैयाकरणैरसाधुकृताः स्युरभिनवाश्च शब्दाः साधुकृताः स्युरिति साधुत्वव्यवस्थैवाव्यवस्था स्यात् । एवञ्च ‘ प्रयोजनमनुद्दिश्य मन्दोऽपि न प्रवर्तते ’ इति वचनात् त्रिकालदर्शिभि ऋषिभिः पाणिन्यादिभिर्यतो शब्दशास्त्रारम्भः कृतस्तेनैव ज्ञायते शब्दस्य नित्यत्वमिति पाणिन्यादीनामभिप्रायः ।

अत एव सूत्रकारेण पाणिनिना " पृषोदरादीनि यथोपदिष्टम् " इति सूत्रेण यथोपदिष्टस्य पृषोदरादित्वात्साधुत्वं प्रतिपाद्य शब्दानां नित्यत्वं संसाधितम्[1]।

**महाभाष्यकारमते शब्दतत्त्वविचारः**

भगवाञ्छ्रीपतञ्जलिर्महाभाष्ये स्फोटात्मकं ध्वन्यात्मकञ्चेति भेदेन शब्दस्य द्विविधं स्वरूपं सम्मनुते। तत्र प्रथमं मुख्यं स्वरुपं ब्रवीति। तथा हि - ' येनोच्चारितेन सास्नालाङ्गुलककुदखुरविषाणिनां सम्प्रत्ययो भवति स शब्दः ' इत्यनेन महाभाष्यवचनेन यस्य परिष्कार ईदृशः सम्पन्नः ' ध्वनिव्यङ्ग्यत्वे सत्यर्थविषयकबोधजनकत्वं स्फोटत्वम् ' ।

ध्वन्यात्मकस्य शब्दस्य लक्षणं तु ' अथवा प्रतीतपदार्थको लोके ध्वनिः शब्द इत्युच्यते '[2]। तद्यथा – शब्दं मा कुरु, मा शब्दं कार्षीः इति। एतेनोद्धारणेन इदं वक्तुं शक्यते यद् ' येनोच्चारितेन कस्यचित् पदार्थस्यावबोधो भवति स शब्दः '। वर्णध्वनिभेदाच्छब्दो द्विविधः – वर्णलक्षणश्च ध्वनिलक्षणश्च । यं शब्दं श्रुत्वा अर्थस्य ज्ञानं भवति स शब्दो वर्णात्मक इत्युच्यते। यथा – ' गौः ' इति। एतेन सास्नालाङ्गूलककुदखुरविषाणिनां सम्प्रत्ययो भवति। यं शब्दं श्रुत्वा कस्यचिदपि अर्थस्यावबोधो न भवति स शब्दो ध्वनिः। यथा – शङ्खादीनां भेर्यादीनाञ्च। एतेषु ध्वनिमात्रस्यैव ज्ञानं भवति न तु कश्चिदर्थो ज्ञायते। शब्दो हि श्रोत्रेण गृह्यते, अत एव श्रावणः शब्द इति कथ्यते। येनोच्चारितेन यस्यार्थस्याभिव्यक्तिर्भवति स एव शब्दः स्फोटात्मक इति निष्कर्षरूपेण विज्ञायते।

तथा च वक्ष्यति " तपरस्तत्कालस्य " इति सूत्रस्य व्याख्यावसरे स्फोटः शब्दो ध्वनिः शब्दगुणः। कथम् ?। भेर्याघातवत्। स्फोटस्तावानेव भवति। ध्वनिकृता वृद्धिः।

**ध्वनिः स्फोटश्च शब्दानां ध्वनिस्तु खलु लक्ष्यते।**
**अल्पो महांश्च केषाञ्चिदुभयं तत्स्वभावतः॥**[3]

एवञ्च ' श्रोत्रोपलब्धिर्बुद्धिनिर्ग्राह्यः प्रयोगेणाभिज्वलित आकाशदेशः शब्दः '[4] इत्यत्र ' श्रोत्रोपलब्धिः ' इत्यनेन ध्वन्यात्मक अनित्यः शब्दः प्रतिपादितः। ' बुद्धिनिर्ग्राह्यः ' इत्यनेन स्फोटात्मको नित्यः शब्दो निरूपितः।

' उत्पन्नः कः ' इत्यादिषु उत्पन्नशब्दस्याभिव्यक्तिपरकत्वम्। अर्थात् कण्ठताल्वादिकरणव्यापारैः ककारादिध्वनीनामभिव्यक्तिरेव भवति न तूत्पत्तिः। अत एव ' शब्दमुच्चारयति ' इत्येव लोके व्यवह्रियते न तूत्पादयति शब्दमिति। अत उक्तं भगवता भाष्यकारेण महाभाष्ये – यथा कुम्भकारकुलं गत्वा घटं कुरु, अस्ति प्रयोजनमनेन इत्युच्यते जनैः नहि तथा शाब्दिककुलं गत्वा कश्चित् कथयति शब्दं कुरु प्रयोक्ष्य इति लौकिकदृष्टान्तेन शब्दस्य नित्यत्वं संसाधितम्।

एवं भगवता भाष्यकारेण महाभाष्ये – नित्यः शब्दो नित्येषु शब्देषु कूटस्थैरविचालिभिर्वर्णैर्भवितव्यम्

**सर्वे सर्वपदादेशाः दाक्षीपुत्रस्य पाणिनेः।**
**एकदेशविकारे हि नित्यत्वं नोपपद्यते॥**

इत्यादिभिः कण्ठत एव शब्दस्य नित्यत्वं संसाधितम्। एवं प्रकारेण भगवाञ्छ्रीपतञ्जलिः भाष्ये शब्दतत्त्वं विमर्शितवान्।

**वार्तिककारमते शब्दतत्त्वविचारः**

उक्तानुक्तदुरुक्तानां विशिष्टः प्रवाचकः कात्यायनः शब्दस्य स्फोटरूपत्वं स्वीकरोति। ' सिद्धे शब्दार्थसम्बन्धे ' इति वार्त्तिके शब्दस्य सिद्धत्वं नित्यत्वं ब्रुवता श्रीकात्यायनेनापि स्फोटात्मा शब्दः सुष्ठु स्वीकृत एव। अत्र हि कात्यायनवार्त्तिके शब्दार्थसम्बन्धपदघटिते यः शब्दशब्दः स स्फोटरूपेऽर्थ एव, अन्यथा शब्दस्य नित्यत्वरूपं सिद्धत्वं कथं स्यात् ?।

" स्वं रूपं शब्दस्याशब्दसञ्ज्ञा " इति सूत्रोपरि शब्देनार्थगतेरर्थस्यासम्भवात् तद्वाचिनः सञ्ज्ञाप्रतिषेधार्थं स्वरूपवचनम्, न वा शब्दपूर्वको ह्यर्थे सम्प्रत्ययस्तस्मादर्थनिवृत्तिरिति वार्तिकद्वयेन वार्तिककारः शब्दस्य स्फोटात्मकत्वं रूपमुररीकरोति । एतद्भिन्नस्य स्फोटातिरिक्तस्य शब्दस्य स्वीकारेऽर्थबोधासम्भवाद् वार्तिकद्वयोरनुपपत्तिः भवेदित्यभिप्रायः। अतस्तेन एकमेवाद्वितीयः स्फोटात्मकः शब्दः शास्त्रसिद्धान्तेन प्रतिपादितः[5]।

**मीमांसकमते शब्दतत्त्वविचारः**

शब्दस्वरूपविषये शाबरभाष्ये अथ गौरित्यत्र कः शब्दः गकारौकारविसर्जनीया इति भगवानुपवर्षः। श्रोत्रग्रहणे ह्यर्थे लोके ' शब्द ' शब्दः प्रसिद्धः। ते च श्रोत्रग्रहणा इत्युक्तम्।

एवञ्चैतेषां मते गौरित्यत्र गकारौकारविसर्जनीयाः त्रय एव वर्णा गोशब्दसञ्ज्ञकाः। न तु वैयाकरण इव एभ्यः त्रिभ्यो वर्णेभ्योऽतिरिक्तः त्रिभिरभिव्यज्यमानः किञ्चित् पदार्थान्तरं गोशब्दः। तत्रोक्तं हेतुद्वयं भाष्यकारेण शबरस्वामिना।

---

1 शब्दतत्त्वसमीक्षा – पृ. 57

2 महाभाष्यम् - पस्पशा

3 महाभाष्यम् – ( 1-1-70 )

4 महाभाष्यम् – ( अइउण् सूत्रभाष्यम् )

5 वेदव्याकरणयोः शब्दतत्त्वविमर्शः – पृ. 15

1. ते च श्रोत्रग्रहणाः ।
2. यद्येवमर्थप्रत्ययो नोपपद्यते इति सन्दर्भेण प्रदर्शितम् ।

अत्रायं भावः – श्रोत्रेन्द्रेण गृह्यमाणो ह्यर्थः शब्द इति कथ्यते लोके । एवञ्च गोरित्यत्र गकारौकारविसर्जनीया एव कर्णगोचरीभवन्ति । अतस्त एव शब्दा न तु तदतिरिक्तः कश्चित् स्फोटादिः । तैः प्रत्येकवर्णानुभवजन्याः संस्कारा एकां स्मृतिमुपजनयन्ति । तस्यां च स्मृतौ सर्वे वर्णा युगपदेव प्रतिभान्तीति स्मृतिप्रतिभासितानां वर्णानामेव वाचकत्वम् । तथा चोक्तम् –

**यद्वा प्रत्यक्षतः पूर्वं क्रमज्ञातेषु यत्परम् ।**
**समस्तवर्णविज्ञानं तदर्थज्ञानकारणम् ।।**

मीमांसकैः शब्दस्य नित्यत्वमुक्तम् – ‘ नित्यस्तु स्याद् दर्शनस्य परार्थत्वात् ’ इति । अर्थात् शब्दस्य उच्चारणं परप्रत्ययजनकत्वाच्छब्दस्य नित्यत्वमिति ।

अत्रायं भावः – वक्त्रा शब्दस्य उच्चारणं श्रोत्रेऽर्थबोधाय क्रियते, अनुभूयते च लोके । एवं च वक्त्रोच्चारणानन्तरं श्रोतुरर्थावगतिपर्यन्तं यदि शब्दः सन्तिष्ठते तर्हि पश्चात् केन हेतुना स नाशयिष्यते । अतः सिद्ध्यति शब्दस्य नित्यत्वमिति मीमांसकानामभिप्रायः[6] ।

**वैशेषिकनये शब्दतत्त्वविचारः**

वैशेषिकाणां मते तु यथा महत्या वीच्याक्षुद्रास्तरङ्गा जायन्ते । क्षुद्रेभ्यः क्षुद्रतमाः । तेभ्योपि क्षुद्रतमा अनेन क्रमेण वेलाभूमिपर्यन्तं तरङ्गा गच्छन्ति । तथा हि संयोगो विभागोत्पन्नाच्छब्दात् सर्वदिक्षु वलयाकृता परिव्याप्तैका शब्दधारा जायते ।

**नैयायिकमते शब्दतत्त्वविचारः**

महर्षिणा गौतमेन ‘ आप्तोपदेशः शब्दः ’ इति सूत्रयाञ्चक्रे । येषां शब्दानामनाप्तोच्चरितत्वं न तेषां प्रामाण्यम् । येषां च शब्दानामाप्तोच्चरितत्वं तेषामेव शब्दानां प्रामाण्यमिति तेषां मतम् ।

तैर्ध्वनिवर्णभेदेन द्विविधः शब्दः स्वीकृतः । यदुक्तं तर्कसंग्रहेऽन्नभट्टपादैः श्रोत्रग्राह्यगुणः शब्दः । आकाशमात्रवृत्तिः । स द्विविधः । ध्वन्यात्मको वर्णात्मकश्च । तत्र ध्वन्यात्मको भेर्यादौ वर्णात्मकः संस्कृतभाषादिरूपः ।

न्यायवैशिषिकैः संयोगाद्विभागाद्वा शब्द उपजायते, उत्पन्नाश्चासौ शब्दः सर्वदिक्षु कदम्बगोलकाकारेण सजातीयनिकटदेशानि शब्दान्तराणि आरम्भते, तानि च शब्दान्तराणि शब्दान्तराण्युत्पादयन्ति वीचितरङ्गवृत्त्यारम्भप्रयत्नः शब्दः श्रोताकाशजन्मा श्रोत्रेण गृह्यत इति प्रतिपाद्यते । तथा चोक्तम् न्यायसिद्धान्तमुक्तावल्याम् -

**शब्दो ध्वनिश्च वर्णश्च मृदङ्गादिभवो ध्वनिः ।**
**कण्ठसंयोगादिजन्या वर्णास्ते कादयो मताः ।**
**सर्वः शब्दो नभोवृत्तिः श्रोत्रोत्पन्नस्तु गृह्यते ।।**
**वीचितरङ्गन्यायादुत्पत्तिस्तु कीर्तिता ।**
**कदम्बगोलन्यायादुत्पत्तिः कस्यचिन्मते ।।**[7]

ईश्वराङ्गीकर्तारो नैयायिकाः ‘ आप्तोपदेशः शब्दः ’ इति शब्दलक्षणमुक्त्वा शब्दस्य नित्यत्वं नाङ्गीकुर्वन्ति । श्रोत्रग्राह्येषु ध्वनिष्वेव वर्णत्वमप्यङ्गीकुर्वन्ति । तथा चोक्तम् – क्रमोत्पन्नानामपि तेषां संस्कारद्वारा कार्यकरत्वं सम्भवतीति । अथवा पूर्ववर्णानां स्मरणेऽन्त्यवर्णानुभवे च ज्ञानयौगपद्यप्रसङ्ग इति वरमन्त्यवर्णोऽपि स्मर्यमाणः प्रत्यायकोऽस्तु । तदेवमेकस्मृत्युपारूढाः सर्वे वर्णाः समुदिता अर्थप्रतीतिं जनयन्तीति न कोऽपि दोष इति नैयायिकानामभिप्रायः । साङ्ख्यानामपीदमेव मतमिष्टम् ।

**वेदान्तिनां मते शब्दतत्त्वविचारः**

वेदान्तिनोपि मीमांसका इव प्रत्येकवर्णानुभवभावनानिचयलब्धजन्मस्मृतिदर्पणारूढानां वर्णानामेव वाचकत्वं स्वीकुर्वन्ति । तथा चोक्तं ब्रह्मसूत्रशाङ्करभाष्ये – वृद्धव्यवहारे च इमे वर्णाः क्रमाद्यनुगृहीता गृहीतार्थविशेषसम्बन्धाश्च सन्तः स्वव्यवहारेप्येकैकवर्णग्रहणानन्तरं समस्तवर्णप्रत्यवमर्शिन्यां बुद्धौ तादृशा एव प्रत्यवभासमानाः तं तमर्थमव्यभिचारेण प्रत्याययिष्यन्ति इति [8] ।

**सांख्यमते शब्दतत्त्वविचारः**

सांख्यमते स्थूलसूक्ष्मभेदेन शब्दो द्विविधः । तथा हि इन्द्रियविषयमतिवर्तमानम् आकाशतन्मात्रमेव सूक्ष्मः, इन्द्रियग्राह्यश्च स्थूलः ।

वैयाकरणैरिव वेदानामपौरुषेयत्वरक्षार्थमेव मीमांसकाः शब्दानां नित्यत्वं स्वीकुर्वन्ति । अनित्यत्वं च न्याय-वैशेषिक-सांख्य-बौद्ध-जैनसम्प्रदायानुसारिभिः समर्थ्यते ।

इदं तु सत्यम्, यदधिकारिभेदेन दृष्टिभेदेन परिस्थितिविशेषेणैव वस्तुस्वरूपमवधार्यत इति । अत एव यदि नैयायिका वेदान्तस्य टीकां कुर्वन्ति उत वा वेदान्तिनो न्यायस्य टीकां चरन्ति, तदा तत्र तत्र तत्तद्वासना नूनमेव परिलक्षिता भवतीति नापरोक्षं प्रेक्षावताम् ।

तस्माच्छब्दतत्त्वविचारे ते सर्वे च स्वस्वसिद्धान्ते सन्ति दृढा । केऽपि नान्यस्य वार्तां श्रोतुं वाञ्छन्ति । भिन्ने भिन्ने सत्यपि तर्के शाब्दिका मीमांसकाश्च शब्दस्य नित्यत्वं स्वीकुर्वन्ति । न्याय-वैशेषिक-सांख्य-बौद्ध-जैनसम्प्रदायानुसारिणः शब्दस्यानित्यत्वं कथयन्ति ।

परञ्च महाभाष्ये भगवाञ्छ्रीपतञ्जलिरेव शब्दतत्त्वस्य हार्दं कथयति । महाभाष्यकारः ‘ सिद्धे शब्दार्थसम्बन्धे ’ इति वार्तिके विचारयन्नाह शब्दस्य तद्वारकनिर्दिष्टवस्तुनश्च सम्बन्धो नित्यः । शब्देषु वस्तुबोधिका शक्तिस्तु स्वाभाविकी । सा न केनचिदुत्पादिता विद्यते । वस्तून्यपि नित्यान्येव सन्ति ।

---

[6] शब्दतत्त्वसमीक्षा – पृ. 58

[7] न्यायसिद्धान्तमुक्तावली – ( 164-166 ) – पृ. 703

[8] भूषणसारतत्त्वप्रकाशिका – पृ. 266

संक्षेपतो वक्तुं शक्यते यच्छब्दः, अर्थः, तयोश्च सम्बन्धो नित्यो भवति। नित्यतेयं लौकिकव्यवहाराज्ज्ञायते। वस्तूनि वीक्ष्य जनास्तद्बोधाय शब्दान् प्रयुञ्जते। शब्दरचनायां परिश्रमो न क्रियते कार्यते वा। परिश्रमस्तु केवलमनित्यवस्तून्येव भवति। यथा घटस्यावश्यकतायां जातायां सत्यां वयं कुम्भकारगृहं गत्वा ब्रूमः घटं कुरु इति। न तद्वच्छब्दप्रयोगाय वैयाकरणाः स्मर्यन्ते प्रार्थ्यन्ते च। लोके वस्तूनि दृश्यन्ते तथा तद्बोधयितुं शब्दप्रयोगाः क्रियन्ते। अयमेव भाषोत्पत्तेरस्ति सिद्धान्तः।